# संस्कृत-वार्ता:

दिनाङ्क :- 01/01/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- राष्ट्रपतिः द्रौपदी मुर्मुः आर्टिफिशियल इंटेलिजेंस इति कृत्रिम-बुद्धिमत्ताम् अध्येतुम् आग्रहं कृतवती उक्तं च यत् – 'स्किल द नेशन चैलेंज' इति अभियानं भविष्य-कृते कार्यबलं निर्मास्यति।
- प्रधानमन्त्री नरेन्द्र-मोदी देशस्य प्रथमं वन्दे-भारत-शयनयान-रेलयानं शीघ्रं लोकार्पयिष्यति। एतत् रेलयानं कोलकाता-गुवाहाटी नगरयोः मध्ये चलिष्यति।
- भारतीय-रिज़र्व-बैङ्केन उक्तं यत् देशस्य अर्थव्यवस्था निरन्तरं सुदृढतां याति ।
- केन्द्र-सर्वकारेण चतुर्भ्यः नूतन-श्रम-संहिताभ्यः प्रारूपस्य नियमाः अधिसूचिताः। जनानां परामर्शाः च आमन्त्रिताः।
- गर्भवती महिलाभ्यः स्तनपानकारयितृभ्यः मातृभ्यः च प्रमुखायाः प्रधानमन्त्री मातृ-वन्दना-योजनायाः नववर्षाणि पूरितानि ।

---------------------------------------------------

<u>राष्ट्रपतिः ए.आई.</u>

राष्ट्रपतिः द्रौपदी मुर्मुः अवोचत् यत् आर्टिफिशियल इंटेलीजेंस अर्थात् कृत्रिमबुद्धिमत्ता-प्रौद्योगिक्या सह देशे सकारात्मक-परिवर्तनानि आनयितुम् अयम् एकः अवसरः वर्तते। श्रीमती मुर्मुः राष्ट्रपति-भवने आर्टिफिशियल इंटेलीजेंस इत्यस्मै कौशल-विकासस्य एस.ओ.ए.आर. इत्यस्य अन्तर्गतं विशेष- कार्यक्रमं सम्बोधयति स्म। राष्ट्रपतिना उक्तं यत् विविध-क्षेत्रेषु आर्टिफिशियल इंटेलीजेंस इत्यस्य महत्त्वं तीव्रतया वर्धते, अथ च इदानीं सर्वेभ्यः अस्याः प्रौद्योगिक्याः अध्ययनम् अनिवार्यम् अभवत्।

राष्ट्रपति-वर्यया प्रौद्योगिक्याः माध्यमेन भारतस्य दायित्वपूर्ण-भविष्याय आकार-प्रदातुम् आह्वानं कृतम्। कार्यक्रमस्य अवधौ राष्ट्रपतिना विद्यार्थिभ्यः संसत्-सदस्येभ्यश्च ए.आई.

प्रमाणपत्राणि प्रदत्तानि। सममेव 'स्किल द नेशन चैलेंज' इत्याख्यस्य राष्ट्रिय-जागरूकताभियानस्य शुभारम्भो विहितः।

--------------------------------------------------

<u>रेलमन्त्री वन्देभारतम्</u>

रेलमन्त्रिणा अश्विनी वैष्णवेन घोषणा कृता यत् देशस्य प्रथमा शयन-यानयुता वन्दे-भारत-रेलसेवा शीघ्रमेव गुवाहाटी कोलकाता नगरयोः मध्ये सञ्चालयिष्यते। रेलमन्त्रिणा उक्तं यत् आगामि पञ्चदशतः विंशतिः दिनेषु प्रधानमन्त्री नरेन्द्रमोदी अस्य रेलयानस्य उद्घाटनं करिष्यति। तेनोक्तं यत् रेलविभागेन स्वदेशी रूपेण निर्मितस्य वन्दे- भारत-शयन-यानस्य अन्तिमं तीव्रगतियुतं परीक्षणं सफलतापूर्वकं पूरितम्। राजधान्यां नवदिल्ल्याम् अद्य वार्ताहर-सम्मेलने श्रीवैष्णवः अवदत् यत् षोडश शयन-यानयुतम् एतत् यानम् एकसहस्रात् सार्धैकसहस्र-किलोमीटरयावत् यात्रायै आरप्स्यते। अमुना प्रतिपादितं यत् एतत् रेलयानं सुखप्रदं शयनासनं स्वचालित-द्वारम् आधुनिक-शौचालयं च समेत्य अत्याधुनिक-सौविध्यैः च युतं वर्तते। अस्य रेलयानस्य भाटकविषये अपि रेलमन्त्रिणा विवरणम् उपस्थापितम्।

--------------------------------------------------

<u>रिज़र्वबैङ्कः अर्थव्यवस्था</u>

वैश्विक-समाह्वानानानि सत्यपि भारतीयार्थव्यवस्था निरन्तरं दृढ-गत्या समेधते। एतत् हि भारतीय-रिज़र्व-बैङ्के स्वस्य नवीनतम-वित्तीय-स्थिरता-प्रतिवेदने प्रतिपादितम्। एतत् प्रबल-स्थानीय-अभ्यर्थनायाः मध्यम-मुद्रास्फीतेः विवेकपूर्ण-व्यापकार्थिक-नीतिनां समर्थनेन सम्भवम् जातम्। प्रतिवेदनस्य अनुसारम् अनुकूल-वित्तीय-परिस्थितिभिः वित्तीयापणषु स्वल्पास्थिरतया च स्थानीय-वित्तीय-प्रणाली-सरला जायते। भू-राजनीतिक-घटनाक्रमं व्यापार- सम्बद्ध-समाह्वानानि च समेत्य बाह्यानिश्चितानां कारणेन निकट-भविष्ये सङ्कटानां सञ्चेतना अपि प्रदत्ता।

--------------------------------------------------

<u>नववर्षम्</u>

अद्य समग्रे हि विश्वे जना: षड्विंशत्युत्तर-द्विसहस्रतमस्य नूतनवर्षस्य स्वागतं कुर्वन्तः सन्ति। राष्ट्रपति: उपराष्ट्रपतिः प्रधानमन्त्री च नववर्षे जनेभ्य: शुभकामना: प्रदत्तवन्तः। स्वीये शुभसन्देशे राष्ट्रपति: उक्तवती यत् इदं नववर्षं समेषां जीवने ऊर्जसः सञ्चारं कुर्यात् सकारात्मकपरिवर्तनानि च आनयेत्। तया आशा प्रकटिता यत् ऐषमः सर्वेभ्यः सुखं शांतिम् समृद्धिम् च आनयेत्। अथ च दृढस्य समृद्धस्य च भारतस्य निर्माणाय नवोर्जसः संचारं करिष्यति। एकस्मिन् सामाजिकांतर्जालीये सन्देशे उपराष्ट्रपतिना सी.पी.राधकृष्णनेन अपि सकलेभ्य: जनेभ्य: नववर्षम् आलक्ष्य शुभसन्देशा: प्रदत्ता:। प्रधानमन्त्रिणा नरेन्द्रमोदिना अपि जगतः शान्तेः सुखस्य च कामना कृता।

-------------------------------------------------

## केन्द्रं श्रमसंहिताः

केन्द्रेण चतसृणां नूतनानां श्रम-संहितानां प्रारूपनियमाः अधिसूचिताः। एतासु श्रम-संहितासु वेतन-संहिता विंशति ऊनविंशति, औद्योगिक-सम्बन्ध-संहिता विंशति-विंशति, सामाजिक-सुरक्षा-संहिता विंशति-विंशति तथा व्यावसायिक-सुरक्षा, स्वास्थ्य-कार्य-स्थिति-संहिता विंशति-विंशति इत्येता: अन्तर्भवन्ति। एते नियमाः कर्मचारिणः, वेतनं, वृत्यावसराणां प्रकारान्, उपदानम्, अधिलाभांशं, कर्मकराणां सामाजिकसुरक्षां च निरूपयन्ति।

-------------------------------------------------

## प्रधानमन्त्री मातृवन्दना योजना

गर्भवती महिलाभ्यः स्तनपानकारयितृभ्यः मातृभ्यः च प्रमुखायाः प्रधानमन्त्री मातृ-वन्दना-योजनायाः नववर्षाणि पूरितानि। इयं योजना गर्भवती महिलाभ्यः स्तनपानकारयितृभ्यः मातृभ्यः च स्वास्थ्ये पोषणे समुन्नयनाय वित्तीयं साहाय्यं प्रदातुम् आरब्धासीत्। प्रधानमन्त्री मातृ-वन्दना योजना केन्द्र-सर्वकारस्य प्रमुखा योजना अस्ति। अस्याः उद्देश्यं समाजस्य आर्थिक-सामाजिक-रूपेण पश्चवर्ति-वर्गाणां महिलाभ्यः मातृत्वावधौ आर्थिक-साहाय्यप्रदानं वर्तते। प्रथम-शिशवे पञ्चसहस्ररूप्यकाणि द्वितीया यदि कन्या जायते चेत् षड् सहस्र-रूप्यकाणां साहाय्यं प्राप्यते। एतत् अतिरिच्य पात्र- महिलाभ्यः जननी-सुरक्षा-योजनायाः अन्तर्गतं प्रोत्साहन-राशिः

अपि प्रदीयते। महिला-बाल-विकास-मन्त्रालयस्य अनुसारम् इदानीं यावत् अस्यां योजनायाम् आहत्य सार्धचतुः कोटिः महिलाः पञ्जीकृताः अथ च नवदश-सहस्र-कोट्यधिक-रूप्यकाणि लाभार्थिभ्यः वितरितानि। इयं योजना गर्भावस्थायाः अवधौ पोषण-स्वास्थ्य-परीक्षणेन सह मातुः शिशोः च स्वास्थ्यं सुनेश्चेतुं साहाय्यं विदधाति।

---------------------------------------------------

**ऋतु-संचेतना**

भारत-ऋतु-विभागेन अस्मिन् मासे पञ्चदिनाङ्कपर्यन्तं ओडिशा, पञ्जाब्, हरियाणा, चण्डीगढ, दिल्ली इत्येतेषु प्रदेशेषु अतिसघन-निहाराच्छादनस्य संभावना प्रकटितास्ति। असम, मेघालय, बिहार, हिमाचलप्रदेश, नागालैण्ड, मणिपुर, मिजोरम, त्रिपुरा, उत्तरप्रदेश, उत्तराखण्ड, पश्चिमबंगाल, सिक्किम-इत्येतेषु प्रदेशेषु श्वः यावत् सघन- कुञ्झाटिकायाः स्थितिः भविष्यति। आगामि-दिनद्वये हरियाणा, चण्डीगढ, दिल्ली, हिमाचलप्रदेश, पञ्जाब इत्येतेषु राज्येषु अपि शीतलहर्याः स्थितिः भविष्यति इति विभागेन पूर्वानुमानम् प्रकटितम् अस्ति। अद्य हिमाचलप्रदेशे, उत्तराखण्डे, पश्चिम-उत्तरप्रदेशे, दिल्ल्यां, राजस्थाने च अल्पवृष्टेः संभावना विभागेन प्रकटिता अस्ति।

।। इति वार्ताः ।।